**SRI BHAGAWAN MAHAVEER JAIN COLLEGE**

Vishweshwarapuram, Bangalore 560004

**Mock Examination Question Paper-2** (January 2019)

| | | | |
|---|---|---|---|
| **Course:** | II PUC | **Subject:** | Sanskrit |
| **Max. Marks:** | 100 | **Duration:** | 3:15 hrs. |

---

**Time – 3 hours** **Marks – 100**

एकवाक्येन संस्कृतभाषया उत्तरं लिखत। 10x1=10

1. अद्यापि देवाः कुत्र जन्म इच्छन्ति?
2. परदु:खेन के अत्यन्तदु:खेन: भवन्ति ?
3. प्रव्राजक: वणिज: गृहं किमर्थमगच्छत् ?
4. शारद्वतः कः ?
5. राणाप्रतापः कस्मिन् ग्रामे अजायत ?
6. महश्वेता कं प्रति स्ववृत्तान्तं कथयति ?
7. "सा" शान्तिः कुत्र कार्यं करोति ?
8. परशुरामः कर्णं किमस्त्रं उपदिशति ?
9. कामधेनुगुणा का ?
10. कृष्णशास्त्रिणां अध्यापकेषु एकस्य नाम लिखत ?

द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्लभाषया वा उत्तरं लिखत।(पञ्चानामेव) 5x2=10

11. भारतवर्षं इति किमर्थं कथ्यते ?
12. विस्मितः राक्षसः विक्रमादित्यं किं पृच्छति?
13. राजपुत्रः मञ्जूषां प्राप्य किं करोति ?
14. राणाप्रतापस्य प्रतिज्ञा का ?
15. पुण्डरीकस्य अनुरागं महाश्वेता कथं जानाति ?
16. कर्णं प्रति परशुरामोपदेशं लिखत ?
17. शान्त्यः सौन्दर्यं वर्णयत ?

पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड आङ्लभाषया वा कुरुत।(त्रयाणामेव) 3x3=9

18. अयं तु नवमस्तेषां द्वीपसागरसंवृतः।
 योजनानां सहस्रं तु द्वीऽपोयं दक्षिणोत्तरात्।

19.तदेतां वीक्ष्य दुःखं मे जातो भक्तो हि मे भवान्
तेनैवमुक्तवानस्मि त्यक्त्वा मौनं भवत्कृते॥

20.कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति॥

21. आस्त्रप्रयोगवेलायां यदा ते सूत भावना।
तदा सर्वाणि चास्त्राणि भवेयुर्निष्फलानि हि॥

22. धनहीनो न हीनश्च धनिकः स सुनिश्चयः।
विद्यारत्नेन यो हीनः स् हीनः सर्ववस्तुषु ॥

पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । (चतुर्णमेव) 4x2=8

23. अद्यप्रभृति मनुष्यभक्षणं परित्यज।

24. भवतु,अनिर्वर्णनीयं परकलत्रम्।

25. नैतद्धनं स्वीकर्तुं न इच्छामि ।

26. पुण्डरीक इति नाम चक्रे ।

27. अहो गुरुकुलवैभवम् ।

28. परीक्षार्थं इतोऽपि समयावकाशः विद्यते ।

दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्लभाषया वा उत्तरं लिखत।(पञ्चानामेव) 5x5=25

29. विक्रमादित्यस्य परोपकारगुणं वर्णयत।

30. प्रव्राजकः ।

31. शार्ङ्गरवदुष्यन्तय़ोः संवादः'

32. कीदृशं मुनिकुमारम् अपश्यम् इति महाश्वेता वर्णयति ?

33. कर्णशापप्रसङ्ग: ।

34. शान्तिदर्शनात् तरूणस्य चिन्तासन्तति: ?

मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत । 4x1=4

35. उत्तरं यत् समुद्रस्य ...............दक्षिणं च यत्।

36. वैरिणां .................समुद्रोपमम् आसीत्।

37. भगवत: अशेषत्रिभुवनसुन्दरं............आसीत् ।

38. अङ्गुलीयक शून्या मे................।

| | | | |
|---|---|---|---|
| रूपं | अङ्गुलि: | सैन्यं | हिमवान् |

I.

संयोजयत । 4x1=4

39. जाह्नवी ऋषिकुमार:
40. पौरव: पापम्
41. पुण्डरीक: गङ्गा
42. किल्बिषम् दुष्यन्तः

रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत । (त्रयाणामेव) 3x1=3

43. पुत्थलिका भोजराजं प्रति अब्रवीत्।
44. अनुचरा: प्रव्राजकस्य वचनं अपालयन् ।
45. मेवाड इति स्थलं राजस्थाने प्रसिद्दमासीत् ।
46. शान्ति:धनं न स्वीचकार।LK
47. अम्बया सह् स्नातुम् अभ्यागमम् ।

यथानिर्देशं कुरुत । ( चतुर्णामेव ) 4x3=12

48. **सन्धिं विभजत / योजयत (त्रयाणामेव)**

    तथेति, प्रागेव, तावच्च, ततः+ततः ,अस्त्र:+अभ्यास:।

49. **विग्रहवाक्यं / समस्तपदं लिखत ।(त्रयाणामेव)**

    कामक्रोधौ, राजपुत्रः, योगिन:वेषम्, स्वस्य जन्मस्थानम्,कमनीय रूपं यस्या: सा।

50. **लिङ्ग विभक्ति वचनानि लिखत । (द्वयोरेव)**

    पौरवैः ,रोटिकाम्, सलिलम्,पादयो:

51. **लकार पुरुष वचनानि लिखत । (द्वयोरेव)**

    भवन्तु , आसीत्, भवेत्, वदन्ति

52. **पदपरिचयं कुरुत । (त्रयाणामेव)**

    स्नातुम्, कृत्वा निर्गत:, स्मरन् ,आदाय .

53. **प्रयोगं परिवर्तयत ।**

    राणाप्रतापः प्रतिज्ञां स्वीकृतवान् ।

    **अथवा**

    स्त्रिया गृहं रक्ष्यते ।

54. **अलङ्कारं सलक्षणं निर्दिशत ।**

    विदयारत्नेन यो हीन: स हीन: सर्ववस्तुषु ।

    **अथवा**

    विलासमिव सरस्वत्या: मुनिकुमारकं अपश्यम्।

55. कन्नडभाषया आङ्लभाषया वा अनुवादयत । 5

    पुस्तकानि सम्पर्कसाधनानि वर्तन्ते । बहून् विषयान् एकत्र संगृहय सुचारुरूपेण निवेदयितुं पुस्तकमेव समर्थं

माध्यमम् । पुस्तकमाध्यमेन शाश्वतरूपेण विचारविनिमयः कर्तुं शक्यते । यः पुस्तकानि अधिकं पठति सः अतीव बुद्धिमान् भवति । पूर्वं तालपत्रेषु भूर्जपत्रेषु च जनाः लिखन्ति स्म । मुद्रणयन्त्रस्य अन्वेषणानन्तरं पुस्तकप्रचारः अधिकः सञ्जातः ।

56. संस्कृतभाषया अनुवादयत । 5

ತಾರಕಾಸುರನನ್ನು ಸಂಹರಿಸಿದ ಕಾರ್ತಿಕೇಯನು ಶಿವನ ಕಿರಿಯ ಮಗ.ವಿಘ್ನನಿವಾರಕನಾದ ಗಣೇಶನು ಹಿರಿಯಮಗ,ಸಂಪತ್ತಿಗೆ ಅಧಿಪತಿಯಾದ ಕುಬೇರನು ಪರಮಮಿತ್ರ.ಜಗನ್ಮಾತೆಯಾದ ಪಾರ್ವತಿಯು ಅವನ ಹೆಂಡತಿ.ಮಾವನು ಪರ್ವತರಾಜ.ಅವನ ವಾಹನವು ನಂದಿ.ಅವನ ಸೇನಾಪ್ರಮುಖನು ವೀರಭದ್ರ.ಇಂತಹ ಕುಟುಂಬವನ್ನು ಹೊಂದಿದ್ದರೂ ಪರಶಿವನು ಭಿಕ್ಷಾಟನೆಯನ್ನು ಮಾಡುತ್ತಾನೆ.ಎಂತಹ ವಿಧಿವಿಪರ್ಯಾಸ!

Karthikeya the destroyer of demon Taraka. is the younger son of Lord Shiva. Ganesha the recover of the obstacles is the his elder son. Kubera the lord of wealth is his friend. Parvathi the mother of universe is his wife.Parvatharaja the king of mountains is his father-in-law.Nandhi is his vehicle. Veerabhadra is his chief of army.In spite of all this,Lord Shiva begs.what a destiny.

57. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तरणि लिखत । 5x1=5

पुरा अयोध्यायां सगरो नाम राजा आसीत्। एकदा स:अश्वमेधयागं कर्तुं ऐच्छत्। तदर्थं स: यज्ञाश्वं अमुञ्चत।इमं विषयं ज्ञात्वा इन्द्र: यज्ञाश्वं अपहृतवान्। तं पातालं नीत्वा तत्र तप:कुर्वत: कपिलमुने: समीपे स्थापितवान् । यज्ञाश्वं अन्विषन्त:सगरपुत्रा: भूमिं खनन्त:पातालं अगच्छन्। तत्र यज्ञाश्वं दृष्टवा,कपिल एव चोर इति मत्वा ,ते तं महामुनि: अवाच्यशब्दै: अनिन्दन् । तदा कुपितो मुनि: नेत्रे उन्मील्य तान् सर्वान् भस्मीकृतवान्। अत: ज्येष्ठा: वदन्ति 'अविचार्य किमपि कर्म न करणीयम्'इति । प्रसन्नं वहन्ति नद्यः । वायुः मन्दं मन्दं प्रयाति । प्रसन्ना प्रतिभा

प्रश्नाः -

i. सगरो नाम राजा कुत्र आसीत्?
ii. राजा सगर: किं कर्तुं ऐच्छत् ?
iii. सगरस्य यज्ञाश्वं क: अपहृतवान् ?
iv. कुपितो मुनि: किं अकरोत् ?
v. अत: ज्येष्ठा: किं वदन्ति ?

अथवा

युष्माकं विद्यालयस्य वार्षिकोत्सवार्थं आगन्त मित्राय पत्रमेकं लिखत ।

---शुभमस्तु---